**संस्कृत-वार्ता:**

**दिनाङ्क : 20/01/2026**

**सायम्- 06:20**

**<u>आदौ मुख्यवार्ता:</u>**

- भाजपेति-दलस्य कार्यकारि-अध्यक्षः नितिन-नबीनः नूतन-राष्ट्रिय-अध्यक्षत्वेन अद्य निर्वाचितः नवदिल्ल्यां दलस्य कार्यालये प्रधानमन्त्रिणः अन्येषां वरिष्ठनेतृणाम् उपस्थितौ च अध्यक्षस्य कार्यभारं स्वीकृतवान् ।

- प्रधानमन्त्री अधोरेखितवान् यत् श्रीनबीनस्य पार्श्वे युवशक्तेः सङ्घटनकार्यस्य च विस्तृतः अनुभवः अस्ति यः दलस्य कार्यकर्तृणाङ्कृते अतीव लाभप्रदः भविष्यति ।

- प्रवर्तन-निर्देशालयेन अद्य केरल-तमिलनाडु-कर्नाटक-राज्याणां एकविंशति-स्थानेषु धनशोधन-निवारण-अधिनियमस्य अन्तर्गतम् अन्वेषण-कार्याणि कृतानि

- तमिलनाडु-राज्यस्य राज्यपालः आर्.-एन्.-रविः अद्य राज्य-विधानसभायां तस्य प्रथागत-अभिभाषणस्य भागरूपेण सज्जीकृतं डी.एम्.के-सर्वकारेण लिखितं प्रपत्रम् अशुद्धि-कारणात् पठितुम् अस्वीकृतवान् ।

· लद्दाखस्य लेह-नगरे खेलो-इण्डिया-शीतकालीन-सत्रीय-क्रीडायाः षष्ठमं संस्करणं समारभत्।

**<u>अथ वार्ता: विस्तरेण</u>**

**<u>भाजपा-नवाध्यक्षः</u>**

भाजपेति-दलस्य कार्यकारि-अध्यक्षः नितिन-नबीनः नूतन-राष्ट्रिय-अध्यक्षत्वेन अद्य निर्वाचितः। दलस्य राष्ट्रिय-निर्वाचनाधिकारिः डा. के. लक्ष्मणः इत्येषः दलाध्यक्षत्वेन श्रीनबीनस्य नियुक्तिघोषणां कृतवान्, नवदिल्ल्यां भाजपादलस्य मुख्यालये संघट्टन-पर्वणः अवसरे निर्वाचनस्य प्रमाणपत्रं च तस्मै प्रायच्छत् । भाजपा-दलस्य वरिष्ठः नेता प्रधानमन्त्री च नरेन्द्रमोदी, केन्द्रीयमन्त्रि अमितशाहः, राजनाथसिंहः, जे. पी. नड्डा, नितिनगडकरी च श्रीनबीनस्य सम्मानम् अकुर्वन् । अस्मिन् अवसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना भाजपा-दलस्य राष्ट्रिय-अध्यक्षत्वेन नियुक्ताय श्रीनबीनाय वर्धापनं प्रदत्तम्, सहैव प्रधानमन्त्रिवर्यः भाजपेति दलं विश्वस्य बृहत्तमं दलत्वेन अपि समबोधयत् । प्रधानमन्त्री अधोरेखितवान् यत् श्रीनबीनस्य पार्श्वे युवशक्तेः सङ्घटनकार्यस्य च विस्तृतः अनुभवः अस्ति यः दलस्य कार्यकर्तृणाङ्कृते अतीव लाभप्रदः भविष्यति ।

**[(null)-1400-PM-NITIN NABIN-YOUNG-]**

प्रधानमन्त्री मोदी इत्यपि अकथयत् यत् विगतेभ्यः मासेभ्यः, सङ्घटनस्य लघुत्तमात् विभागात् आरभ्य राष्ट्रिय-अध्यक्षस्य निर्वाचनपर्यन्तं च सम्पूर्णप्रक्रिया पूर्णतया लोकतान्त्रिकरूपेण कृता अस्ति ।

**[-1400-PM-MODI-BJP CULTURE-]**

सभाम् सम्बोधयन् नवनिर्वाचितः भाजपा-दलस्य राष्ट्रियः अध्यक्षः नितिन-नबीनः दलस्य सर्वोच्चस्थानं प्राप्तुम् प्रधानमन्त्रिणं प्रति कृतज्ञतां प्रकटितवान् ।

[(**null**)-**1415-PM-MODI-BJP CULTURE**-]

श्रीनबीनः भाजपा-दलस्य इतिहासे कनिष्ठतमः राष्ट्रियः अध्यक्षः अस्ति सहैव बिहारतः प्रथमः भाजपा-नेता अस्ति यः अस्मिन् पदे नियुक्तः अस्ति। सः सम्प्रति पटना-मण्डलस्य बाङ्कीपुर्-विधानसभाक्षेत्रस्य प्रतिनिधित्वं करोति, सहैव नितीश-कुमारस्य नेतृत्वे बिहार-सर्वकारे मार्ग-निर्माणविभागम् अपि धारयति ।

**<u>प्रवर्तननिदेशालयः-सबरीमाला</u>**

प्रवर्तन-निर्देशालयेन अद्य केरल-तमिलनाडु-कर्नाटक-राज्याणां एकविंशति-स्थानेषु धनशोधन-निवारण-अधिनियमस्य अन्तर्गतम् अन्वेषण-कार्याणि कृतानि । शबरीमाला-मन्दिरसम्बद्धस्य स्वर्णस्य अन्य-मन्दिरसम्पत्तीनां च दुर्विनियोगस्य विषये एतानि अन्वेषणानि कृतानि । अन्वेषणस्य अनन्तरं केरल-अपराध-शाखया पञ्जीकृताः अनेकाः प्राथमिक्यः सन्ति, यासु त्रावणकोर-देवस्वम-बोर्ड इत्यस्य अधिकारिभिः, स्वायत्त-व्यक्तिभिः, मध्यस्थैः, आभूषण-विक्रेतृभिः च सम्बद्धानि गहना-पराधिक-षड्यन्त्राणि प्रकाश्यन्ते । प्रारम्भिक-अन्वेषणस्य अनुसारं, स्वर्ण-परिहित-पवित्र-कलाकृतयः आधिकारिक-अभिलेखेषु ताम्रफलकरूपेण प्रस्तुताः आसन्, तथा च 2019 तमवर्षात्-2025 तमवर्षपर्यन्तस्य कालखण्डे मन्दिर-परिसरात् अवैधरूपेण निष्कासिताः। चेन्नई-कर्नाटक-नगरयोः निज-सौकर्येषु रासायनिकप्रक्रिया-माध्यमेन एतत् स्वर्णं निष्कासितम् इति कथ्यते, अन्वेषणे सबरीमला-नगरे अन्यानां वित्तीय-अनियमिततानां सङ्केताः अपि प्राप्ताः, यासु मन्दिर-नैवेद्यानाम् अनुष्ठानानां च दुर्विनियोगः अपि अन्तर्भवति ।

**तमिलनाडु-राज्यपालः**

तमिलनाडु-राज्यस्य राज्यपालः आर्.-एन्.-रविः अद्य राज्य-विधानसभायां तस्य प्रथागत-अभिभाषणस्य भागरूपेण सज्जीकृतं डी.एम्.के-सर्वकारेण लिखितं प्रपत्रम् अशुद्धि-कारणात् पठितुम् अस्वीकृतवान् । लोकभवनं विस्तृतं स्पष्टीकरणं प्रायच्छत् यत् तस्य मैक्रोफ़ोन् इत्यस्य पुनः पुनः पिधानेन तथा च सभायाः पुरतः स्वमतं स्थापयितुम् अनुमतिं न प्राप्तुं राज्यपालः भाषणं पठितुम् अस्वीकृतवान् ।लोकभवनम् अकथयत् यत् तमिलनाडु-सर्वकारस्य तन्मतं यस्मिन् राज्येण द्वादशलक्षकोटिरुप्यकाणां निवेशः आकर्षितः अस्ति इति सत्यात् बहुदूरम् अस्ति ।तमिलनाडु-राज्यस्य मुख्यमन्त्री एम्. के. स्टालिन् इत्येषः अवदत् यत् राज्यपालस्य ईदृशं कार्याचरणं निर्वाचितसर्वकारस्य अपमानम् अस्ति, सहैव तेन एतत् कार्यम् असंवैधानिकम् इति प्रोदीरितम् ।

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**पञ्जाबः-प्रहाराभियानम्**

पञ्जाब-आरक्षिबलैः अद्य आपरेशन-प्रहार इत्यभियानस्य आरम्भः कृतः। राज्यं अपराध-मुक्तं कर्तुं अपराधिनः च निगडितुम् अद्यारभ्य सम्पूर्णे पञ्जाबराज्ये द्वादश-

सहस्र-आरक्षकाधिकारिणां द्विसहस्र-दलानि अन्वेषणाभियानं प्राचालयन् । चण्डीगढनगरे पत्रकारसम्मेलने, पञ्जाब-राज्यस्य आरक्षक-महानिदेशकः गौरव-यादवः अवदत् यत् आरक्षकाः षष्टि-संख्याकानां प्रमुखापराधिनां, तेषां द्वादश-शतं-सहयोगिनाञ्च अन्वेषणं कुर्वन्तः सन्ति ये अपराधेषु संलग्नाः वर्तन्ते । सः अवदत् यत्, तेषाम् सर्वेषाम् विरुद्धं कठोरं कार्याचरणं विधास्यते । सः अवदत् यत् तेभ्यः साहाय्यप्रदायिकाः वित्तपोषणम्, सुरक्षिताश्रयाः, शस्त्र-आपूर्तिशृङ्खलाः, सम्प्रेषण-शृङ्खला चेत्यादिभिः सम्बद्धाः सम्पूर्ण-व्यवस्थाः भग्नाः भविष्यन्ति । अपारध-विरुद्ध-सहायिकां 93946-93946 इति दूरभाष-सङ्ख्याम् उद्घाट्य, सः नागरिकान् पञ्जाब-राज्यं सुरक्षितराज्यं कर्तुं स्वक्षेत्रेषु अपराध-गतिविधीनां विषये सूचयितुं समाहूतवान्।

**<u>उपराष्ट्रपतिः-उद्घाटनम</u>**

उपराष्ट्रपतिः सीपी राधाकृष्णन्-वर्यः अद्य महादेव-देसाई-पुस्तकालय-विस्तारः इत्यस्य उद्घाटनम् अकरोत् सहैव नवदिल्ल्यां **<u>एज ऑफ़ एनलाइटनमेंट: महात्मा गान्धीज विजन</u>** इत्येतस्य पुस्तकस्य विमोचनम् अपि अकरोत् । उपराष्ट्रपतिः नवदिल्ल्यां गांधी-आश्रम इत्यत्र हरिजन-सेवक-संघः इत्यस्य यात्रां कुर्वन् एतस्य पुस्तकस्य विमोचनं कृतवान् । श्रीराधाकृष्णनवर्यः आश्रमस्थस्य कस्तूरबा-संग्रहालयस्य अपि यात्राम् अकरोत् । एकस्मिन् सामाजिक-संदेश-माध्यमे , श्रीराधाकृष्णन्-वर्यः अकथयत् यत् पुस्तकालयाः सामाजिकपरिवर्तनस्य साधनानि सन्ति । सः अकथयत् यत् ज्ञानेन चरित्रं, विवेकः सामाजिक-दायित्वं च आकृतिं लभन्ते ।

**<u>प्रधानमन्त्री-गिरिराजः</u>**

प्रधानमंत्री नरेंद्रमोदी अद्य भारतस्य वस्त्रक्षेत्रस्य उदयं प्रकाशितवान् । केंद्रीय-मंत्रिणा गिरिराज-सिंहेन राष्ट्रीयदैनिकाय लिखितम् एकं सामाजिक-संदेशपटले प्रकाशयन् , श्रीमोदी अकथयत् यत् वस्त्रक्षेत्रं पारंपरिकोद्योगात् सम्वर्ध्य आजीविका-सृजनस्य जन-केंद्रित-विकासस्य च स्वरूपे परिवर्तयितुं लेखे लिखितमस्ति ।

**लेह-खेलो-भारतम**

लद्दाखस्य लेह-नगरे खेलो-इण्डिया-शीतकालीन-सत्रीय-क्रीडायाः षष्ठमं संस्करणं समारभत्। उपराज्यपालः कविन्दरगुप्ता इत्येषः कार्यक्रमस्य उद्घाटनम् अकरोत्। एकविंशति-राज्यानां केन्द्रशासितप्रदेशानां च क्रीडकाः आइस-स्पोर्टिंग-इवेंट्स-हॉकी तथा स्केटिङ्ग् इत्यनयोः स्पर्धां करिष्यन्ति ।

**।। इति वार्ताः ।।**